International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 35-37
© 2026 IJMH
www.themultijournal.com
Received: 26-02-2026
Accepted: 09-03-2026
Publish : 10-03-2026

**रिनिता आओन**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः-517507

**Correspondence:**
**रिनिता आओन**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः-517507

# "पारीक्षितम्" इति आधुनिकनाटकस्य समीक्षणम् ।

**रिनिता आओन**

**शोधसारः-** आधुनिकसंस्कृतनाट्यकारेषु पण्डितपरीक्षितशर्मा कश्चन प्रसिद्धः नाट्यकारः। सप्तविंशति नाटकसम्वलितं 'परीक्षिन्नाटकचक्रम्' इति ग्रन्थस्य कर्ता अयं नाट्यकारः। नाट्यसंग्रहस्यास्य तृतीयनाटकं वर्तते 'पारीक्षितम्'। नाटकमिदं महाभारताश्रितं पुराणाश्रितं च। नाटकस्य मुख्यकेन्द्रविन्दुः आसीत् राजा परीक्षितः। तस्य एकक्षणस्य असावधानता, ऋषिं प्रति अनादरः, तथा तस्य फलस्वरुपं प्राप्तः शापः नाटकस्य वर्णनीयविषयः। अस्मिन् शोधपत्रे नाटकस्यास्य नाटकीयतत्त्वं, मानवजीवनस्य क्षणस्थायित्वं, अहंकारस्य परिणामः, धर्मवोधः, भागवतकथायाः माहात्यम्, मोक्षसाधना हि तथा साहित्यिकं सामाजिकं वैभवं च विचार्यते।

**प्रस्तावना-** 'पारीक्षितम्' इति पुराणमाधारितं विरचितं गाम्भीर्यपूर्णं दुःखात्मकं नाटकमस्ति। नाटकस्यास्य मूलविषयः महाभारतोत्तरयुगे स्थितस्य राज्ञः परीक्षितस्य करूणजीवनवृत्तान्तः। अस्मिन् नाटके राजा परीक्षितः आदर्शवान्, न्यायपरायनः, प्रजावत्सलः सुशासकश्च रूपेण उपस्थापितः। एकदा अरण्ये मृगयाकाले तृष्णार्तः क्लान्तश्च सः ऋषेः शमीकस्य आश्रमे समागतः।

**'सर्वत्र शान्तता भाति। मुनीनां स्वान्तवत् भृशम्।।**
**कदापीदं नचस्थानं। लौकिकानां भवत्य हो।।'**[1]

महर्षिः गहनाध्ययननिमग्नः वभुवः तस्मात् मौनं धारयन् परीक्षितस्य प्रत्युत्तरं न ददौ। तस्मिन् क्षणे अयं परीक्षितः विभ्रमात् ऋषिकण्ठे मृतसर्पं स्थापितवान्। अनिच्छाकृतः सः अपराधः एव नाटकस्य मूलसंघटनायाः सूत्रं भवति। ऋषिशमीकपुत्रः शृङ्गीः पितुः अपमानस्य प्रतिशोधाय राजानं परीक्षितं अभिशापं प्रददौ यत् सप्तदिनानां मध्ये तक्षकनागदंशनेन तस्य मृत्युर्भविष्यति इति। तद्यथा **"कोऽयं दुरात्मा मनुजपशुः, मम पितुः स्कन्धे तत्रापि तपस्यतः,सृतसर्पं विसृष्टवान।योयं एवं पन्नगसस्त्राक्षीत्,सः तिग्मतेजसा तक्षकाशी विषपन्नगेश्वरेण,मद्वाक्य बलात् चोदितेन, सप्तरात्रादितः यमस्य सदनं नेष्यति।(इति शापजलं विसर्जति)"**[2] - सः एव अभिशापः नाटकं दुःखात्यकं परिणतिं प्रति नयति। प्राप्ते शापे राजा परीक्षितः राज्यं परित्याज्य गङ्गातटे आश्रयं गृह्णाति मुक्तेः मार्गानुसन्धानं करोति च। तत्र शुकदेवमुनिर्मुखात् भागवतपुराणश्रवणं कृत्वा सः भक्त्या ज्ञानेन वैराग्येन च मृत्युम् अतिक्रम्य मोक्षं प्राप्नोति। अतः पारीक्षित नाटकस्य कथा न केवला पौराणिकीकथा रुपेण निरुपिता अपि तु मानवजीवनस्य क्षणस्थायित्वम् अहंकारस्य परिणामः धर्मचिन्ता, धर्मवोधः, भागवतकथायाः माहात्म्यं, मोक्षसाधनायाः गुढं दार्शनिकं तत्वं सुगभीररुपेण प्रकाशिता।

**कविपरिचयः-**

आन्ध्रप्रदेशस्य गुण्टुरमण्डलस्य मजलीग्रामे पण्डितः ओगेतिपरीक्षितशर्मा जन्म अलभत्। तस्य वंशः ओगेति। कौण्डिन्यगोत्रस्य कृष्णायुर्वैदिककुलम्। तस्मिन् काले पिता वैदिकप्रचाराय बालिकानां कृते विद्यालयम् उद्घाटितवान् इति तथ्यं तस्य उदारनीतिविषये प्रमाण। परीक्षित शर्मा वेनारस हिन्दुविश्वविद्यालयात् संस्कृतं, हिन्दी, आङ्गलं, प्राचीनभारतीयसंस्कृतिः, पुरातत्त्वं च विषयेषु वी.ए, पुनः बम्वाई विश्वविद्यालयात् संस्कृतं, प्राकृतं,भाषाविज्ञानं, आङ्गलभाषायां च स्नातकोत्तरं पदवीं प्राप्तवान्।

अयं पण्डितः तेलेगुभाषायां पुनः संस्कृतभाषायां विद्वान् आसीत्। अनयोः भाषयोः अपि बहुनि काव्यनाटकानि च रचितानि। तस्य नाटकेषु मातृभाषायाः तथा तस्य जीवनस्य छाया सम्यक्रुपेणा- पतिता। तस्य अध्यापना पारम्परिकी तथा आधुनिकी उभयत्र अभवत्। अतः तस्य तातकालिकः

सामाजिक विषये ध्यानधारणा सुष्ठुः आसीत् एवं मन्ये। तस्य अध्ययनस्य प्रभावः नाटकेषु दरीदृश्यते।

अनेन पण्डितेन 'ललित-गीत-लहरी' नाम्ना एका गीतपुस्तिका विरचिता। तस्य कानिचन नाटकानि दिल्लीदुरदर्शने प्रदर्शितानि सन्ति, कानिचन आकाशवाण्यां नभोनाट्यरुपेण प्रस्तुतानि सन्ति। तस्य काश्चन सामग्रीः सर्वत्र विश्वविद्यालयेषु उपाधिपाठ्यक्रमेषु समाविष्टा सन्ति। परिवारस्य पारम्परिकधार्मिकवातावरणाय पण्डितशर्मा वैदिक संस्कृतेः कठोरसमर्थकः प्रवक्ताः च अभवत्। स्वातन्त्र्य समये तस्य हृदये देशभक्तेः वीजं मूलं कृतवान्। युवावस्थायां तस्य संघप्रीतिरपि आसीत् । अतःसंघे स्थित्वा कार्यमपि कृतम् तेन। तत्रैव राणाप्रतापस्य योगदानस्य प्रेरणा प्राप्तम्। कार्गिलविजयः देशभक्तिपूर्णः एकाङ्कीयः नाटकः अस्ति तथा च चक्रस्य अन्ये केचन नाटकाः तस्य उग्रराष्ट्रवादं दर्शयन्ति।

'यशोधरा' इति ग्रन्थस्य कृते अखिलभारतीय कालिदास पुरस्कारः, 'श्रीमत्प्रतापराणायनम्' इति ग्रन्थस्य कृते अखिलभारतीयसाहित्य-अकादेमीपुरस्कारः, राष्ट्रीयसंस्कृतविश्वविद्यालयात् (तिरुपतिः) वाचस्पतिः (D.Lit) उपाधिः, पण्डित-महाकवि-चक्रवर्ती इत्यादिभिः उपादिभिः अपि स च पण्डितः ससम्मानितः।

**साहित्यिकं विश्लेषणम्-** नाट्यकारः केवलं पौराणिकघटनारुपेण नाटकं न प्रस्तुतवान्, अपि तु चरित्र-भावना-रस-दार्शनिकदृष्टिकोणैः च गहनं मानवीय दुःखं चित्रितवान्। नाटकस्य कथा सुव्यवस्थिता क्रमाङ्किता च दृश्यते। प्रस्तावनायां भावीघटनानां पूर्वसूचनया कौतुहलं जनितम्। क्रमेण परीक्षितस्य अपराधः, ब्रह्मशापः, अवश्यम्भावी मृत्योः अभिमुखे नाटकम् अग्रसरति। एतेन पूर्वनिर्धारितपरिणामेन नाटकमिदम् अधिकं समृद्धं जातम्। नाटके मुख्यतया करूणरसस्य प्रधानता वर्तते। परीक्षितस्य अनिवार्यमृत्युः तथा तस्य अन्तर्द्वन्द्वः दर्शकानां सहानुभुतिं जनियति। तदनन्तरं शान्तरसस्य वीररसस्य च उपस्थितिः नाटकस्य भावगाम्भीर्यं च वर्धयति।

**रसविश्लेषणम् –** आलंकारिकानां षट्सु सम्प्रदायेषु रससम्प्रदायः अन्यतमः। यद्यपि रसवादस्य आचार्यरूपेण भरतमुनिः प्रसिद्धः परन्तु आद्याचार्यरुपेण नान्दीकेश्वरस्य नाम वारं वारं आयाति। नान्दीकेश्वरस्य कोऽपि रस विषयकः ग्रन्थः अद्यापि न प्राप्तः अतः भरतमुनेः नाट्यशास्त्रं पुनः तत्रोक्तं विभावानुभावव्यभिचारिसंयोगाद रसः निष्पत्तिः इति च वाक्यं रसवादस्य मुलाधारः विचार्यते।[3] उपनिषदि अपि रसस्य आलोचना वर्तते तेषु उपनिषदषु तैतरीय-उपनिषदि उक्तमस्ति – 'रसः ब्रह्मानन्दसहोदरः'।[4] अस्मिन् जगति यावन्तः जीवाः वर्तन्ते सर्वेऽपि विविधरसानाम् आस्वादनं कुर्वन्ति एव। वयं मानवाः नव रसम् आस्वादनं कृत्वा प्रत्फुल्लिताः भवामः। तत्र उक्तं वर्तते शास्त्रेषु- **रस वै सः।** रसः एव परमानन्दकारणम्। भरतमुनेः मते विभावानां, अनुभावानां तथा व्याभिचारिभावानां संयोगेनैव रसास्वादः जायते। परीक्षितशर्मणः कृते परीक्षिन्नाटकचक्रे तृतीयनाटके करूणरसस्य प्रभावं परिलक्षते। करूणरसस्य स्थायीभावः वर्तते शोकः। भरतमुनेः मते विभावः स एव हेतुः यः दर्शकानां हृदये स्थायिभावं उत्पादयति। स च द्विविधः आलम्वन विभावः उद्दीपन विभावश्चेति। अस्मिन् नाटके शृङ्गेः शापः, मृत्युपूर्वसूचना च विभावौ स्तः। अनुभाव भवति पारीक्षितस्य अनुशोचना, आत्मसमर्पणम्। एवं व्याभिचारि भाव अस्ति -विषाद, दीनता, भय, इत्यादि। मृत्युमुखे पारीक्षितस्य वैराग्यं, आत्मचिन्ता, धर्मश्रवणं च शान्त रसः विकशितः भवति।

**धार्मिकस्थितिः-** भागवत पुराणां नामैकं महापुराणम् अस्ति। एतत् भक्तिप्रधानं धर्मग्रन्थः चास्ति। विष्णोः पूर्णावतारस्य स्वयम् भगवान श्रीकृष्णस्य प्रति गाढा भक्तिः अस्य पुराणस्य मुख्यः विषयः। हिन्दुपौराणिक साहित्यस्य बहवः आख्यानाः तथा च श्रीविष्णोः चतुर्विंशतिः अवताराणां कथा भागवतपुराणे लिपिवद्धाः सन्ति। भागवतपुरामं पवित्रतमं च सर्वश्रेष्ठं च पुराणं इति मन्यते। अस्मिन् पुराणे जागतिककर्मबन्धनात् मोक्षस्य उपायाः, विशुद्ध आध्यात्मिकज्ञानस्य प्राप्तविधिः, तथा च विष्णुभक्तेः माहात्म्यं वर्णितम्। भागवतपुराणस्य कथा आदौ व्यासदेवस्य पुत्र शुकदेवेन कथिता। यदा मृत्युपथयात्री राजा परीक्षित् ज्ञातवान् यत् सप्तदिनानन्तरं तक्षकनागस्य दंशनेन तस्य मृत्युः अनिवार्यः,तदा स आत्मज्ञानस्य मोक्षलाभस्य च कृते श्रीकृष्णमहिमाश्रवणमेव जीवनस्य सर्वोत्तमोपायं कृतवान्। आसन्न मृत्युमुखे स्थिताः पारीक्षित बुध्यते यदा एतस्मिन् समये जागतिकं विषयं न, अपि तु भक्ति एव एकः मुक्तिमार्गः अस्ति। अतः सः शुकदेवं भागवत् कथां वर्णयितुं अनुरुन्धति।

**"इदं भागवतं राजन्। पुराणं मुनिनाकृतम्।**
**अधीतं तत्तपुराणं तु। द्वापरे पितृ सन्निधौ।।**
**मयापुरामहाराज। समधीतं प्रियं भृशं।**
**तदहंतेभिदास्यामि। स्यान्मुकुन्दे मतिप्रियम्।।**
**योगिनां नृप निर्णीतं। हरेर्नामानुकीर्तनम्।**
**यस्यचित्तं भवत्यस्मिन्। तस्य सर्वं भविष्यति।।"**[5]

**सामाजिक-विश्लेषणम्-** अस्मिन् नाटके समकालीनसमाजस्य गम्भीरं प्रतिविम्बं दृश्यते। नाट्यकारः राज्ञः परीक्षितस्य जीवनसंघटनां केन्द्रीकृत्वा समाजव्यवस्थां, धर्मचेतनां तथा मानवीय सम्बन्धानां चित्रं प्रस्तुतवान्। नाटके राजा परीक्षित् आदर्शः राजधर्मस्य प्रतीकः आसीत्। सः प्रजावत्सलः, न्यायपरायणः धर्मनिष्ठः शासकः चासीत्। समाजे राजा एव सामाजिकीशृङ्खलायाः मुख्यः केन्द्रबिन्दुः आसीत्। राज्ञः आचरणं समाजस्य नैतिकमानदण्डान् निर्धारयति स्म। ऋषि-ब्राह्मणानां समाजे उच्चस्थानं तथा प्रभावः स्पष्टतया दृश्यते। ऋषेः शमीकस्य पुत्रेण शृङ्गिणा प्रदत्तः ब्रह्मशापः शक्तेः दुरूपयोगम् अपि निर्देशयति। अत्र धर्मस्य नाम्ना प्रतिहिंसा तथा आवेगपूर्णनिर्णयस्य कारणेन समाजे कथं अशान्तिः उत्पद्यते इति स्पष्टतया प्रतिविम्बितम् अस्ति।

**निष्कर्षः-** 'पारीक्षितम्' एकम् आधुनिकं नाटकम्। अत्र रसः अलंकारः तथा गुणः सुसज्जितः। आधुनिकनाटके नाट्यतत्त्वीयप्रथा कथं परिपालिता तदपि अबधेयम् अस्माभिः। पारीक्षितम् इति नाटकस्य निष्कर्षे दृश्यते यत् मानवजीवने लघ्वी अपि असावधानता तथा अहंकारः महान् अनर्थस्य कारणं भवितुम् अर्हति। परीक्षितेन क्रोधवशात् असावधानं भुत्वा महर्षिशमीकं प्रति दुर्व्यवहारं चक्रे।

अभिशापस्य विषये ज्ञात्वा राजा परीक्षित् लौकिकासक्तिं त्यक्त्वा भगवान विष्णोः प्रति आत्मानं निवेशयति। सः ऋषेः शुकदेवात् श्रीमद्भागवतं शृणोति तथा जीवनस्य वास्तविकं लक्ष्यं बोधति। अन्ते तक्षकस्य दंशनेन तस्य देहावसानं भवति, किन्तु भगवतः कृपया सः मोक्षं प्राप्नोति। अतः अस्य नाटकस्य माध्यमेन बोध्यते यत् अहंकारः असावधानता च मनुष्याणां पतनस्य कारणम्, किन्तु भगवतः प्रति भक्तिः, धर्माचरणं तथा आत्मज्ञानमेव जीवनस्य परमलक्ष्यं मार्गं च।

**परिशीलितग्रन्थसूची-**

1)**परीक्षिन्नाटकचक्रम्,**पण्डित् ओगेति परीक्षित् शर्मा, महाराष्ट्र, पुणे।

2)**अलंकारशास्त्रेतिहासः**,डा. रामकुमार दाधीच,हंसा प्रकाशन्,57 नाटाणी भवन,जयपुर-302001.

3)**अलंकारशास्त्रेतिहासः**,डा.जगगीशचन्द्रमिश्रः, चौखम्वा सुरभारती प्रकाशन, वाराणसी-221001.

4)**संस्कृतशोधप्रविधिः**,प्रो.प्रभूनाथ द्विवेदी, शारदासंस्कृतसंस्थानम, वाराणसी, 2022, द्वितीयसंस्करणम्।

5)**संस्कृतसाहित्येतिहासः**,धीरेन्द्रनाथवन्द्योपाध्यायः, पश्चिमवंगराज्यपुस्तकपर्षदः, कोलकाता, 1988, प्रथमसंस्करणम्।

6)**ध्वन्यालोकः**,डा.सत्यनारायणचक्रवर्ती, आनन्दवर्धनः, कलिकाता।

7)**संस्कृतसाहित्येर रुपरेखा**,डा. विमानचन्द्रभट्टाचार्यः, विद्योदय लाईव्रेरी, कोलकाता।

8)**उपनिषद् (गीताप्रेस,गोरक्षपुर)**

9)**संस्कृत- नाट्य पीयूषम्,**श्री कृष्ण शर्मा गोविन्दराम चरौरा(देवनागर प्रकाशन,जयपुर)

**सन्दर्भ**

1. परीक्षिन्नाटकचक्रम्।(पारीक्षितम्)4

2. परीक्षिन्नाटकचक्रम्।(पारीक्षितम्)5

3. नाट्यशास्त्र

4. उपनिषद्।गीताप्रेस,गोरक्षपुर।

5. परीक्षिन्नाटकचक्रम्।(पारीक्षितम्)16